किं संस्कृते ह्रस्व एकारः ओकारो वा अस्ति ?

विद्वान् श्रीरमणशर्मा,
काञ्चीशङ्करमठः, नेरूर्–अग्रहारः
तमिळ्नाडु

"किं संस्कृते ह्रस्व एकारः ओकारो वा अस्ति ?" इति प्रश्नो भवति चेत् सामान्यतः सर्वे संस्कृतज्ञाः किम् उत्तरं ददति? "सर्वथा नास्ति" इति खलु ? अहं तु वदामि, अवश्यं संस्कृते ह्रस्वः एकारः ओकारश्च अस्ति । कथं भोः इति चेत्, नाहं स्वयं ब्रवीमि, अपि तु संस्कृतविषये मूर्धन्यप्रमाणभूतः महाभाष्यकारः पतञ्जलिः स्वयम् एकारस्य ओकारस्य च ह्रस्वो वर्तते इति वदति – "छन्दोगानां सात्यमुग्रिराणायनीयाः अर्धम् एकारम् अर्धम् ओकारं च अधीयते" इति (एओङ्सूत्रे एचइग्घ्रस्वादेशे इत्यत्र च) । "अर्धम् एकारम् ओकारम्" इत्यस्य च अर्थः स्पष्ट एव – योऽयं प्रसिद्धो दीर्घ एकारः ओकारश्च, तस्य अर्धं, तन्नाम "ह्रस्वम्" इति । अग्रे एषामेव "तत्रभवताम्" इति पूजया परामर्शाच्च इमे शिष्टाः अप्रमत्तभाषिणः इति एषां प्रामाण्यं दृढीक्रियते ।

भोः तर्हि "कौमुदी यदि चाधीता वृथा भाष्यपरिश्रमः" इत्युक्तरीत्या कौमुदी भाष्यस्य सारभूता इति स्वीकृते सति, "एचामपि द्वादश, तेषां ह्रस्वाभावात्" इति तत्रत्या पङ्क्तिः किम् अप्रमाणम् ?

अप्रमाणम् इति केन वा उक्तम् । संस्कृतं हि लौकिकं वैदिकं चेति द्विविधम् । कौमुदीकारश्च स्वरप्रक्रियां वैदिकप्रक्रियां च स्वीयस्य ग्रन्थस्य सर्वान्ते निक्षिपन् लौकिकसंस्कृते एव स्वस्य प्रमुखं तात्पर्यं दर्शयति । तदनुसृत्य एकारस्य ओकारस्य च ह्रस्वः नास्ति इति तेन उक्तम् । महाभाष्यकारेण हि सामवेदस्य सात्यमुग्रिशाखायां राणायनीयशाखायां चैव ह्रस्वस्य एकारस्य ओकारस्य च सद्भावः उक्तः । स्वयमेव ह्यसौ वदति – "नैव हि लोके नाप्यन्यस्मिन् वेदे अर्ध एकारोऽर्ध ओकारो वास्ति" । वेदशाखाविशेषे यद्वर्तते तत् वेदाध्यायिभिः स्वयं वेदाध्ययनकाले ज्ञास्यते इति लोकेभ्यः संस्कृतबोधने कौमुदीकारेण नाविष्कृतम् ।

अपि च योऽपि सात्यमुग्रिराणायनीयशाखायां ह्रस्व एकार ओकारो वा, तद्विषयेऽपि भाष्यकारः अनुक्षणं वदति – "पार्षदकृतिरेषा तत्रभवताम्" इति । कैयटश्च अस्यार्थं कथयति – "गीतिवशात् तथा उच्चारणम् इत्यर्थः" । तन्नाम "प्रयोगकाले एवं भवति तावदेव" इति कैयटस्य अभिप्रायः । तर्हि "तदेकं वद निश्चित्य – एकारह्रस्वः ओकारह्रस्वश्च अस्ति वा न वा" इति चेत्, उच्यते ।

उच्चारणे अस्ति, पृथग्वर्णत्वेन नास्ति । विवृणोमि श्रूयताम् । उदाहरणाय संस्कृते इदमस्ति – रामः हरिः गुरुः इत्यादि । तत्र एकैकत्र विसर्गस्य एकैकविधम् उच्चारणम् इति सर्वेषां संस्कृतज्ञानां प्रत्यक्षम् । परन्तु विसर्गस्य एकैका अपि उच्चारणविधा प्रत्येकं पृथग्वर्णत्वेन नैव परिगण्यते खलु ? विसर्गः एक एव सन् एषु स्थलेषु विभिन्नाकारेण उच्चार्यते इति खलु उच्यते सर्वैः विषयज्ञैः ? तद्वत् ह्रस्वः अकारः एव एकारसदृशतया ओकारसदृशतया वा केषुचित् वैदिकस्थलेषु उच्चार्यते इत्यतः "तौ उच्चारणविशेषमात्रेण वर्तेते, पृथग्वर्णौ तु न" इति आचार्याणाम् आशयः इति वक्तुं शक्यते ।

(एवमेव सवर्णदीर्घसन्धौ "ऋति सवर्णे ॠ वा" इत्यादिवार्तिकविहितः प्रसिद्धाद् ॠवर्णदीर्घाद् विलक्षणः अपरः ॠवर्णदीर्घोऽपि वर्तते, सोऽपि पृथग्वर्णत्वेन नैव परिगण्यते । तत्तु विषयान्तरत्वात् नात्र प्रपञ्च्यते ।)

॥ उदाहरणविमर्शः, प्रातिशाख्यप्रमाणं च ॥

प्रकृते च एकारह्रस्वस्य ओकारह्रस्वस्य च इदं वैदिकमुदाहरणं महाभाष्यकारेण दर्श्यते – सुजाते एश्वसूनृते, अध्वर्यो ओद्रिभिः सुतम् इति । (एकारस्य अधः ओकारस्य च अधः विद्यमानम् अर्धचन्द्रचिह्नं तयोः ह्रस्वतायाः सूचकत्वेन मुद्रणादौ उपयुक्तम् । केषुचित् संस्करणेषु ए१ ओ१ इति एकाङ्कः स्थापितः।) अत्र पदानुपूर्वी तु – सुजाते अश्वसूनृते, अध्वर्यो अद्रिभिः सुतम् – इत्येव । वेदे प्रक्रियायाः बहुलत्वात् अत्र पूर्वरूपसन्धिः न जातः इति स्थितम् । एवं सति तत्रत्यस्य अकारस्य पूर्वसदृशम् उच्चारणं कर्तव्यम् इति प्रातिशाख्यग्रन्थेषु उक्तम् ।

तद्यथा । ऋक्प्रातिशाख्ये ए–अ ओ–अ इति पूर्वरूपसन्धिरहितयोः वर्णसमवाययोः प्राच्यपदवृत्तिः पञ्चालपदवृत्तिः इति क्रमेण नामनी । "प्राच्यपञ्चाला उपधानिभोदयाः शाकल्यस्य स्थविरस्य" इति च सूत्रम् (२–८१) । अस्यार्थः – एतादृशे सन्धिरहिते वर्णद्वयसमवाये पूर्वत्र विद्यमानेन वर्णेन सदृशो भवति उत्तरत्र विद्यमानः वर्णः – इति । इदं च स्थविरः शाकल्यः इतिनामकस्य आचार्यस्य मतम् ।

तथैव तैत्तिरीयप्रातिशाख्ये । अत्र पूर्वरूपसन्धेः अपेक्षया "ए–अ ओ–अ इति वर्णद्वयसमवाये अकारस्य लोपो भवति" इति प्रक्रिया निरुह्यते । (उच्चारणफलं तु समानमेव ।) क्वचित्तु लोपो न भवति । अतः तानि स्थलानि उक्त्वा अन्ते आचार्यः वदति – "स पूर्वस्यार्धसदृशम् एकेषाम्" (११–१९) । अस्यार्थः – योऽयम् अलुप्तः अकारः, सः पूर्वस्य एकारस्य ओकारस्य वा अर्धसदृशं स्वरूपं प्राप्नोति एकेषाम् आचार्याणां मते – इति । अत्र च एके आचार्याः इत्यनेन सात्यमुग्रिराणायनीयाः एव विवक्षिताः इति व्याख्याने वर्तते ।

यद्यपि उभावेतौ प्रातिशाख्यग्रन्थौ न सामवेदीयौ, अथापि तौ सामवेदविषयमेव प्रसङ्गवशात् अत्र परामृशतः इति वक्तव्यम् । यतः – १) ऋग्यजुःशाखयोः एतादृशस्थले एकारस्य ओकारस्य च ह्रस्वः नैव प्रयुज्यते अध्ययनपरम्परायाम् । २) "एकशतम् अध्वर्युशाखाः, सहस्रवर्त्मा सामवेदः" इति पस्पशाह्निकात् तावतीः शाखाः दृष्टवान् महाभाष्यकारः इति स्थितम् । एवं सति विशेषतः "छन्दोगानां सात्यमुग्रिराणायनीयाः" इति सामवेदस्य इमे द्वे एव शाखे तत्रभवान् परामृशतीति यत्, तस्य अन्यत्र एवम् उच्चारणं नास्तीत्यर्थः । "नाप्यन्यस्मिन् वेदे" इति तस्य कथनादपि इदं स्पष्टतरं निश्चीयते । ३) इममेव महाभाष्याशयम् अनुसृत्य तैत्तिरीयप्रातिशाख्यस्थस्य "एकेषाम्" इति अस्पष्टस्य पदस्य सात्यमुग्रिराणायनीयपरतया एव पूर्वैः व्याख्यानं कृतम् । ४) अतः ऋक्प्रातिशाख्योक्तः स्थविरः शाकल्यः इत्ययम् आचार्योऽपि सामवेदीय इत्येव वक्तव्यम् ।

एवं च एतादृशस्थलेषु यः एकारह्रस्वः ओकारह्रस्वश्च भवति, सः अकारस्यैव स्थाने भवति, न तु स्वातन्त्र्येण । सर्वाणि महाभाष्ये प्रातिशाख्यव्याख्यानेषु च दर्शितानि उदाहरणानि तादृशान्येव ।

॥ उपसंहारः ॥

एतावत्युक्तेऽपि भूयो वैदिकग्रन्थानाम् आलोचनेन क्वचित् स्वतन्त्रोऽपि, तन्नाम अकारस्य अन्यस्य वा वर्णस्य स्थाने अनागतः स्वातन्त्र्येण विहितोऽपि ओकारह्रस्वो वर्तते इति ज्ञायते । तथा हि, सोमयागसम्बन्धिषु प्रयोगेषु न्यूङ्खाख्यः ऋग्वेदप्रयोगविशेषो वर्तते, तथा गायत्रगानाख्यः सामवेदप्रयोगविशेषो वर्तते । एतेषु स्थलेषु ओकारह्रस्वः बहुवारम् उच्चार्यते "अर्धौकारान्" इत्यादिशब्देन विहितः इति तद्विषयज्ञाः पण्डिताः वदन्ति । अतः स्वतन्त्रतयाऽपि ओकारस्य ह्रस्वः क्वचिद् उच्चार्यते इति ज्ञायते ।

एतस्य एकारह्रस्वस्य ओकारह्रस्वस्य च विषये बहुभिः संस्कृतविशेषज्ञैः विचारः कृतोऽस्ति । एवं सति संस्कृते एकारह्रस्वः ओकारह्रस्वश्च "सर्वथा नास्ति" इति "सर्वथा न" वक्तुं शक्यते !

–०–०–०–